shrIrAmarahasyokta shrIrAmAShTottarashatanAmAvaliH

# श्रीरामरहस्योक्त श्रीरामाष्टोत्तरशतनामावलिः

## Document Information

Text title : rAmAShTottarashatanAmAvalI 8

File name : rAmAShTottarashatanAmAvalI8.itx

Category : raama, aShTottarashatanAmAvalI, nAmAvalI

Location : doc_raama

Transliterated by : NA

Proofread by : lalitha parameswari parameswari.lalitha at gmail.com

Latest update : April 20, 2019

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# श्रीरामरहस्योक्त श्रीरामाष्टोत्तरशतनामावलिः

ॐ रामाय नमः ।
ॐ रावणसंहारकृतमानुषविग्रहाय नमः ।
ॐ कौसल्यासुकृतव्रातफलाय नमः ।
ॐ दशरथात्मजाय नमः ।
ॐ लक्ष्मणार्चितपादाब्जाय नमः ।
ॐ सर्वलोकप्रियङ्कराय नमः ।
ॐ साकेतवासिनेत्राब्जसंप्रीणनदिवाकराय नमः ।
ॐ विश्वामित्रप्रियाय नमः ।
ॐ शान्ताय नमः ।
ॐ ताटकाध्वान्तभास्कराय नमः । १०
ॐ सुबाहुराक्षसरिपवे नमः ।
ॐ कौशिकाध्वरपालकाय नमः ।
ॐ अहल्यापापसंहर्त्रे  नमः ।
ॐ जनकेन्द्रप्रियातिथये नमः ।
ॐ पुरारिचापदलनाय नमः ।
ॐ वीरलक्ष्मीसमाश्रयाय नमः ।
ॐ सीतावरणमाल्याढ्याय नमः ।
ॐ जामदग्न्यमदापहाय नमः ।
ॐ वैदेहीकृतशृङ्गाराय नमः ।
ॐ पितृप्रीतिविवर्धनाय नमः । २०
ॐ ताताज्ञोत्सृष्टहस्तस्थराज्याय नमः ।
ॐ सत्यप्रतिश्रवाय नमः ।
ॐ तमसातीरसंवासिने नमः ।
ॐ गुहानुग्रहतत्पराय नमः ।
ॐ सुमन्त्रसेवितपदाय नमः ।

ॐ भरद्वाजप्रियातिथये नमः ।
ॐ चित्रकूटप्रियावासाय नमः ।
ॐ पादुकान्यस्तभूभाराय नमः ।
ॐ अनसूयाङ्गरागाङ्कसीतासाहित्यशोभिताय नमः ।
ॐ दण्डकारण्यसञ्चारिणे नमः । ३०
ॐ विराधस्वर्गदायकाय नमः ।
ॐ रक्षःकालान्तकाय नमः ।
ॐ सर्वमुनिसङ्घमुदावहाय नमः ।
ॐ प्रतिज्ञातास्थिशरवधाय नमः ।
ॐ शरभङ्गगतिप्रदाय नमः ।
ॐ अगस्त्यार्पितबाणासखड्गतूणीरमण्डिताय नमः ।
ॐ प्राप्तपञ्चवटीवासाय नमः ।
ॐ गृध्रराजसहायवते नमः ।
ॐ कामिशूर्पणखाकर्णनासाच्छेदनियामकाय नमः ।
ॐ खरादिराक्षसव्रातखण्डनावितसज्जनाय नमः । ४०
ॐ सीतासंश्लिष्टकायाभाजितविद्युद्युताम्बुदाय नमः ।
ॐ मारीचहन्त्रे नमः ।
ॐ मायाढ्याय नमः ।
ॐ जटायुर्मोक्षदायकाय नमः ।
ॐ कबन्धबाहुदलनाय नमः ।
ॐ शबरीप्रार्थितातिथये नमः ।
ॐ हनुमद्वन्दितपदाय नमः ।
ॐ सुग्रीवसुहृदे नमः ।
ॐ अव्ययाय नमः ।
ॐ दैत्यकङ्कालविक्षेप्त्रे नमः । ५०
ॐ सप्ततालप्रभेदकाय नमः ।
ॐ एकेषुहतवालिने नमः ।
ॐ तारासंस्तुतसद्गुणाय नमः ।
ॐ कपीन्द्रीकृतसुग्रीवाय नमः ।
ॐ सर्ववानरपूजिताय नमः ।
ॐ वायुसूनुसमानीतसीतासन्देशनन्दिताय नमः ।
ॐ जैत्रयात्रोत्सवाय नमः । जैत्रयात्रोद्यताय

ॐ जिष्णवे नमः ।
ॐ विष्णुरूपाय नमः ।
ॐ निराकृतये नमः । ६०
ॐ कम्पिताम्भोनिधये नमः ।
ॐ सम्पत्प्रदाय नमः ।
ॐ सेतुनिबन्धनाय नमः ।
ॐ लङ्काविभेदनपटवे नमः ।
ॐ निशाचरविनाशकाय नमः ।
ॐ कुम्भकर्णाख्यकुम्भीन्द्रमृगराजपराक्रमाय नमः ।
ॐ मेघनादवधोद्युक्तलक्ष्मणास्त्रबलप्रदाय नमः ।
ॐ दशग्रीवान्धतामिस्त्रप्रमापणप्रभाकराय नमः ।
ॐ इन्द्रादिदेवतास्तुत्याय नमः ।
ॐ चन्द्राभमुखमण्डलाय नमः । ७०
ॐ बिभीषणार्पितनिशाचरराज्याय नमः ।
ॐ वृषप्रियाय नमः ।
ॐ वैश्वानरस्तुतगुणावनिपुत्रीसमागताय नमः ।
ॐ पुष्पकस्थानसुभगाय नमः ।
ॐ पुण्यवत्प्राप्यदर्शनाय नमः ।
ॐ राज्याभिषिक्ताय नमः ।
ॐ राजेन्द्राय नमः ।
ॐ राजीवसदृशेक्षणाय नमः ।
ॐ लोकतापपरिहर्त्रे नमः ।
ॐ धर्मसंस्थापनोद्यताय नमः । ८०
ॐ शरण्याय नमः ।
ॐ कीर्तिमते नमः ।
ॐ नित्याय नमः ।
ॐ वदान्याय नमः ।
ॐ करुणार्णवाय नमः ।
ॐ संसारसिन्धुसम्मग्नतारकाख्यामहोज्ज्वलाय नमः । तारकाख्यमनोहराय
ॐ मधुरोक्तये नमः ।
ॐ मृढच्छिन्नमधुरानायकाग्रजाय नमः ।
ॐ शम्बूकदत्तस्वर्लोकाय नमः ।

ॐ शम्बरारातिसुन्दराय नमः । ९०
ॐ अश्वमेधमहायाजिने नमः ।
ॐ वाल्मीकिप्रीतिमते नमः ।
ॐ वशिने नमः ।
ॐ स्वयंरामायणश्रोत्रे नमः ।
ॐ पुत्रप्राप्ति प्रमोदिताय नमः ।
ॐ ब्रह्मादिस्तुतमाहात्म्याय नमः ।
ॐ ब्रह्मर्षिगणपूजिताय नमः ।
ॐ वर्णाश्रमरताय नमः ।
ॐ वर्णाश्रमधर्मनियामकाय नमः ।
ॐ रक्षापराय नमः । १०० रक्षावहाय
ॐ राजवंशप्रतिष्ठापनतत्पराय नमः ।
ॐ गन्धर्वहिंसासंहारिणे नमः ।
ॐ धृतिमते नमः ।
ॐ दीनवत्सलाय नमः ।
ॐ ज्ञानोपदेष्ट्रे नमः ।
ॐ वेदान्तवेद्याय नमः ।
ॐ भक्तप्रियङ्कराय नमः ।
ॐ वैकुण्ठवासिने नमः ।
ॐ चराचरविमुक्तिदाय नमः ।

इति श्रीरामरहस्योक्तं श्रीरामाष्टोत्तरशतनामावलिः समाप्ता ।

Proofread by lalitha parameswari parameswari.lalitha at gmail.com

*shrIrAmarahasyokta shrIrAmAShTottarashatanAmAvaliH*
pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*